Introduction

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# पुरोवाक्

अखिलेऽपि क्षोणीखण्डे नास्ति तादृशः कोऽपि भूखण्डः यत्र ज्ञानविज्ञानानुसन्धानाय नापेक्ष्यते वेदानुग्रहः। वेदेषु कतिपये प्रसङ्गाः इदृग्विधा अपि विद्यन्ते यत्र, समेषां प्राणीनां विषये जीवने यात्राणाञ्च साधनानि निगदितानि सूत्ररूपाणि। यद्यपि वैदिकवाङ्मयप्रपञ्चः वैभवशाली कथ्यते। यतो विज्ञानप्रधानायामप्यस्यां शताब्द्यां वैदेशिकैरस्पृष्टानि सन्ति। इदृशानि बहूनि विज्ञानानि यानि वेदैकशरणैव सुलभानि।

अनेनैव वस्तुतस्तु तत्वदृष्टिणामेव महर्षीणां वक्तृत्वं प्रसिद्धयति। किन्तु यत्र तत्र ते प्रमुखेनाऽपि स्वविचारान् प्रकटयन्तो दरीदृश्यन्ते। यथा साहित्यविदः प्रौढोक्तिसिद्धादर्थादतिरिक्तमन्यमेकं कविनिबद्धवक्तृप्रौढोक्तिसिद्धमप्यर्थ पृथग्रुपेण मन्यन्ते तथा वेदेष्वप्यत्र बोध्यम्। इयमेव संस्कृतसुरभारती भगवती समस्तवाङ्मयस्याधारधरा विराजते, नास्त्यत्र अणोरणीयानपिशंकाकलंकावकाशः। अत एवैषा संस्कृतभाषा प्राचीनेऽनेहसि चिरकालं यावल्लोकभाषासनं समासीनाऽऽसीत्।

आदिकालिकभाषानुसन्धानावसरे भाषाशास्त्रिणां दृष्टिः सर्वप्रथमं वैदिकींभाषमेव स्पृशति। तदवदेव काव्यशास्त्रविद्भिः काव्यकारैश्च वेदाननुसन्धाय तत्रत्यं वृत्तं वर्ण्यवस्तु चानुभूय स्वग्रन्थेषु, काव्येषु, नाटकेषु, प्रबन्धेषु च स्वगिरा निगृणेति। तेषां समेषां विदुषां भाषाभाषिणाञ्च महर्षीणां, महामनीषीनां, शेमुषीणाञ्च गणनाऽपरा। तत्राऽपि आदिकविः वाल्मीकिः व्यासादिप्रभृतिमहर्षयः, परवर्तीकविषु सुबन्धु–बाण–कालिदास–माघ भवभूति–भारवित्यादयः विशेषतो स्मरणीयाः।

संस्कृतसाहित्यपाथोनीधिकृतावगाहानां विद्वद्वरेण्यानां यदखिलभुवनमण्डलमण्डनायमानं भारतखण्डमिदं पुरा सुविरमलमकार्षुः अनेके महनीयकीर्तयः कवीन्द्राः स्वजनुषा सुविदितमेवैतत्। एतेषु मध्ये अन्यतमः कालिदोऽपि विद्यते। वास्तविकं त्विदं यतः कालिदासस्य काव्यसुषमा

इयत्तयावच्छेतुमेव न शक्यते। अस्य काव्येषु नाटकेषु च यत्कवित्वकलायाश्चित्रणचातुर्य प्रतीतिपथमवतरति, तदन्यत्र न सुलभम्।

कालिदासस्य ग्रन्थेषु सर्वं प्रतिभाति। यथा कवेः प्रतिभायाः परिपाकेन, रचनाकौशलेन, भावसौष्ठवेन, भाषामाधुर्येण, सरसाभिव्यक्त्या, सालंकृतपदावल्या, प्रकृतिचित्रणपाटवेन, रसपरिपाकेन, नीरसकथानके सरसतासम्पादनेन,मूलकथापरिवर्तनवैशारद्येन, करुणादिरसञ्चारेण च सर्वातिशायीति तदेव कालिदासग्रन्थाः सर्वस्वत्वेनोद्घुष्यन्ते। तस्य ग्रन्थपठनादेव जनैः आनन्दोऽनुभूयते। तदस्ति तत्रकारणं यत् च कविरयं मानवजीवनस्य जन्मतः जरापर्यन्ततत्त्वं स्वग्रन्थेषु वर्णितमिति।

तत्तत्त्वानामध्ययनेन मम मनसि विचारो सञ्चारो जातः। कविरयं जीवनपद्धत्याः, मानवसंस्कृतेःतत्वानि, प्रकृतिसम्बद्धतत्त्वानि च वर्णनपरकानि सन्ति। सम्प्रतिकाः जनाः संसारेऽस्मिन् प्रकृत्याऽऽपद्भ्यः सम्पीडिताऽऽसन् जीवन्ति। कथमिति? पाश्चात्यवैज्ञानिकाः पौरस्त्यवैज्ञानिकाश्च चिन्तासन्तानपरा। तदवगत्य मे मनसि विचारसरणिरागतोऽयं " भूतं भव्यं भविष्यच्च सर्ववेदात्प्रसिद्धयति" मनोरुक्तिरियं विचार्य यच्च कालिदासादि प्रभृतिभिः काव्येषु पर्यावरणसंरक्षणम्, परिवर्धनम्, अवतरणञ्च समारोहेण वर्णितमिति। कथंकारेण पर्यावरणविषये चिन्तनं न कुर्यादिति। एवं विधाय **"कालिदासकृतीनां पर्यावरणदृष्ट्या विशिष्टमध्ययनम्"** इति विषयीकृत्य अनुसन्धानकार्यं करोम्यहमिति निश्चयीकृत्य वटोदरं समागतम्। अत्रागत्य निवेद्यविषयं कार्यकर्तुमारभेऽहमिति पूर्वोक्तविषये समेषां विदुषां मित्रवर्गाणां प्राचार्याऽऽचार्याणाञ्च मध्ये चर्चा कृतेति। तैरुक्तं शोधकार्यविषयोऽयमतीवरुचिकरः, शोभनपरः, अत्यावश्यकश्चेति। सोल्लासपरायणोऽहम्, विश्वविद्यालयीय कार्यप्रणालिका प्रपूरिता मया।

श्री म. स. विश्वविद्यालयन्तर्गतस्य वटोदर संस्कृत महाविद्यालयस्य व. प्राध्यापकः सकलविद्यावगाहनविशदीकृतमासाः, अध्यापनव्रतनिरताः, परमपूज्याः, श्रीयुत डॉ रामपालशुक्लमहोदयैः अध्यापने अतिव्यस्ततया समयाभावेऽपि शोधप्रबन्धनिर्देशनार्थं मम विनम्रनिवेदनं स्वीकृतम्।

अस्मिन् शोधप्रबन्धे पञ्चपरिच्छेदाः सन्ति। प्रथमपरिच्छेदः परिचयात्मको वर्तते। अत्र हि त्रयो विन्दवः सन्ति। अस्मिन् प्रकरणे महाकवे विरचितग्रन्थानां विषये तथा तस्य विश्वप्रसिद्धकवेः जन्मकालविषये टंकितं वर्तते। तत्कृतीनां वैशिष्ट्यात्मको द्वितीयपरिच्छेदो वर्तते। अत्र षट् विन्दवः सन्ति, प्रत्येकविन्दौ महाकवेः साहित्यिक–सामाजिक–धार्मिक– राजनैतिक– भौगोलिक– तथापर्यावरणदृष्ट्याश्च यद् वैशिष्ट्यं वर्तते, तस्य वर्णनं संक्षेपेण वर्तते।

तृतीयपरिच्छेदः पर्यावरणविचाराख्यो वर्तते। अस्मिन् परिच्छेदे पञ्चविन्दवः सन्ति,तेषु विन्दुषु भारतीय,वैदेशिकविदूषां मते पर्यावरणस्य परिभाषा, आधुनिकविज्ञानदृष्ट्या पर्यावरणविश्लेषणं समीक्षा च कृताऽस्ति। महाकवेः कृतिषु पर्यावरणनिदर्शनं नाम चतुर्थपरिच्छेदो वर्तते। अस्मिन् परिच्छेदे यथाक्रमानुसारेण रघुवंशादारभ्य मालविकाग्निमित्रपर्यन्तं सप्तग्रन्थेषु यत्रकुत्राऽपि महाकविना पर्यावरणविषये यत् किञ्चिदपि वर्णनं कृतमस्ति, तेषां स्थलानां प्रसंगानाञ्च सम्यग् सोदाहरणं विवेचनं कृतवानस्मि।

अग्रे समीक्षात्मको पञ्चमपरिच्छेदः प्रसङ्गानुसारेण स्थानं प्राप्नोति। अस्मिन् परिच्छेदे वैदिक–पौराणिक–उपनिषदग्रन्थेषु यत् पर्यावरणसंरक्षणं वर्तते तस्य समासेन वर्णनं विद्यते। अन्ते मया सर्वेषां महाकविनां पर्यावरणविषयं सम्यगालोड्य कालिदासस्य पर्यावरणविषये समीक्षा कर्तुं प्रयासः कृतोऽस्ति। प्रयन्ते च सम्पूर्णशोधप्रबन्धस्योपसंहाररुपेण सारांशोऽपि मयोऽपनिबद्धोऽस्ति। शोधप्रबन्धस्य परिशिष्टे कालिदासस्य अन्येषां कविनां तुलनात्मकदृष्ट्या वर्णनम्, पर्यावरणविषये सामाजिकवर्गाणां रुचिजागृतिः स्यात्तदर्थं पर्यावरणपरकसूक्तिनां संग्रहः,कालिदासग्रन्थेषु वर्णितभौगोलिकस्थलानि , वनस्पति–जीव– जन्तूनामपि उल्लेखः कृतोऽस्ति। अन्ते पर्यावरणविषये अद्यावधि भूतानि मुख्य विश्वस्तरीयकार्याणि सम्मेलनानि संधयश्च। एतान् विविधग्रन्थेभ्यः संकलनं मम लघुः प्रयासोऽयं विद्यते।

प्रस्तुतशोधप्रबन्धे सम्पूर्णापि लब्धसामग्र्या विवेकपूर्णं तथा आलोचनात्मकोपयोगः कृतोऽस्ति। प्रत्येकस्थले विदूषां रचनानां सन्दर्भरुल्लिखितो वर्तते। आधुनिकविज्ञानशास्त्रं तथा पर्यावरणपरकग्रन्थानामपिसम्यगालोडनं कृत्वा तेषामपि तात्विकशोधपूर्णलेखानामुपयोगः कृतोऽस्ति।

पुरोवाक् समाप्तितः पूर्वं मम निर्देशकाः वेदशास्त्रसम्पन्नाः श्री युत डॉ रामपाल शुक्ल गुरुवर्यान् सदैव मनसा स्मरामि ये खलु माम् स्वजनः मन्यमानं सहजभावेन दूरध्वनिना स्वगृहे आहूय शोधप्रबन्ध – –लेखने मम आत्मबलं सम्वर्धयन् सदा प्रसन्नमनसा ग्रन्थानामनुशीलनात्मकं कार्यं कारितं, तस्यैव फलस्वरूपोऽयं शोधप्रबन्धः समाप्तिं प्रति गच्छन्नस्ति। एतादृशानां गुरुचरणानां कृतघ्नता प्रकटनार्थं मम पार्श्वे शब्दैव न सन्ति।

श्री सोमनाथः संस्कृतविश्वविद्यालयः, वेरावलम्, अस्य माननीयाः प्रथमकुलपतयः प्रा. श्री पंकज जानी महोदयान् कथं विस्मर्तुं शक्नोमि ये खलु प्रत्येकविद्वत्गोष्ठ्यां शोधकार्यार्थे स्वविस्वस्तवचनैः ममोत्साहो वर्धयन्ति स्म। तेषां कृतज्ञतां प्रकटयामि। श्री सोमनाथःसंस्कृतविश्वविद्यालयः अन्तर्गस्य–श्री सोमनाथः संस्कृत महाविद्यालयस्य प्रधाचार्यपदमलङ्कुर्वाणाः डॉ श्री नरेन्द्र एल. पण्ड्या महाभागाऽपि यदा यदा विश्वविद्यालये मया सह शोधप्रबन्धविषये चर्चा भवति स्म, तदा तदा अल्पवयसः सत्यपि ज्ञानवृद्धाः मम अनुशीलनात्मककार्ये स्व विद्वत्पूर्णविचाराः प्रदत्तवन्तः तेषामपि– अनुगृहितोऽस्मि।

श्री ब्रह्मर्षि संस्कृतमहाविद्यालयस्य प्रधानाचार्यपदमलङ्कुर्वाणाः गुरुवर्यान् श्री कृष्णप्रसाद निरौला महाभागान्नपि कृतघ्नतां ज्ञापयामि, ये खलु एका विद्वत्गोष्ठ्यावसरे गान्धीनगरे मम प्रार्थनां स्वीकृत्य गृहे आगत्य मम शोधप्रबन्धे दृष्टिपातं कृत्वा प्रफुल्लवदनेन माम् सारगर्भितवचनैरग्रे लेखनार्थं प्रेरितवन्तः। येभिः सर्वै सह मम पूज्य मातृपितृचरणाः प्रत्यक्षपरोक्षरूपेण आशीर्वचोभिः संसिक्ताः। तदहं तेषां चरणयुगले विनम्री भूतोऽहम्। मम सहधर्मिण्यपि साधुवादार्हेति, यतोहि यया माम् गृहभारविमुक्तः कृतः,येन कार्यमिदं जातमिति। आयुष्मन्तौ पुत्रपुत्रीति स्पृहणीयं सहाय्यमिति तावपि शुभाशीषां राशिषां समायोज्यते।

वटोदरनिवासी मम शिष्यः श्री मेदनीप्रसाद दहालं तथा तस्य धर्मपत्नीं प्रतिमादेवीं कथं विस्मर्तुं शक्नोमि। यदा यदाऽहं तत्र मम गुरुचरणानां समीपे संशोधनविषये मनस्युत्पन्नजिज्ञासां निवारणाय गच्छामि स्म, तदा रात्रौ जागरणं कृत्वा मम लेखनकार्ये सहभागीभूतौ तावपि मम कृते धन्यवादार्हाविति। यत्रोऽहं सेवारतोऽस्मि, तस्य श्री स्वामी

हीरापुरी जी संस्कृतमहाविद्यालयस्य स्वनामधन्याः दैवज्ञाः प्रधानाचार्याःडॉ श्री राजेन्द्रप्रसाद शुक्लः महाभागाः,वरिष्ठअध्यापकाः श्री रामधनी महाभागाः, प्रा. श्री परमात्मानाथ तिवारी महाभागाः, प्रा. श्री रामदीन त्रिपाठी महाभागारपि कृतसहायतत्पराः आसन्। येषां समेषां कृतज्ञतामनुभवामि।

वटोदर संस्कृतमहाविद्यालयस्य प्राचार्याः ओझा महाभागाः, वरिठाः, ज्येष्ठाः, श्रेष्ठाः, अध्यापकगणाश्चते धन्यवादार्हाः। यैः पुस्तकवस्तुजातसहायेन बहुभिः सभाजितम्, तथा च आचार्य श्री कैलास सागर ज्ञानमन्दिर कोबा, गान्धीनगरम् , गुजरात विद्यापीठ पुस्तकालयः अहमदाबाद, राज्यमध्यस्थ ग्रन्थालयः गान्धीनगरं पुस्तकालयः,वनविभागः गान्धीनगरस्य च मया पठने पुस्तकानां तहयोगः प्राप्तः। तत्रतेभ्य ग्रन्थपालेभ्यः कृतज्ञता आविष्क्रियन्ते।

पर्यन्ते च –

**यदत्रसौष्ठवंकिञ्चित् तच्च गुरो र्मे न हि ।**

**यदत्राऽसौष्ठवं किञ्चित् तन्मे सर्वं गुरो र्न हि।।**

विद्वत्चरणचञ्चरीकः

दुर्गाप्रसादः